# अजः शृगालश्च

चित्रेऽस्मिन् एकः शृगालोऽजस्य पृष्ठे पदं निधाय तिष्ठति। कथय, किं निमित्तं स तथा तिष्ठति?

अयं शृगालः पानीयं पातुं वापीं गतो जले ममज्ज। तेन बहिर्गन्तुं वहवो यत्नः कृताः। किन्तु ते सर्वे मुधाऽभवन्।

अत्रान्तरे कोऽप्यजः पिपासाकुलः परिभ्रमन्नागतः। अपृच्छच्च शृगालम् - 'सखे अपि मधुरं जलम्' - इति। शृगालः परेषां वञ्चने नितरां पटुः। अतः स आह - 'मधुरमिति किमुच्यते! केवलं पीयूषमेव! प्रभूतं पिबतोऽपि न मे वाञ्छा निवर्तते। न शक्नोम्येतां वापीं हातुम्' - इति।

अजस्तावदृजुबुद्धिः। अतः स वञ्चकस्य वचनं सत्यं मत्वा शनैरन्तः प्रविशति। ऊर्ध्वमुखमवरोहतस्तस्य पृष्ठे पदं निधाय वापीतः समारोहति शृगालः। अजस्तु वाप्यामेव मज्जनोन्मज्जने कुर्वन् विपेदे।